# Shri Ramakrishna prapattih

# श्रीरामकृष्णप्रपत्तिः

## Document Information

Text title : Shri Ramakrishna prapattih

File name : rAmakRRiShNaprapattiH.itx

Category : deities_misc, gurudev, rAmakRiShNa, prapatti, aShTaka

Location : doc_deities_misc

Author : Swami Harshananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीरामकृष्णप्रपत्तिः

आकारशून्यं त्रिगुणैर्विहीनं
ओङ्कारवेद्यं परमं पवित्रम् ।
प्रपञ्चकारं परिपूर्णरूपं
श्री रामकृष्णं शरणं प्रपद्ये ॥ १॥

तिलेषु तैलं दधनीव सर्पि-
र्व्याप्तं च विश्वे परमं निधानम् ।
सर्वस्य संस्थं हृदयप्रदेशे
श्रीरामकृष्णं शरणं प्रपद्ये ॥ २॥

धर्मस्य वृद्ध्यै सृजनस्य मुक्त्यै-
र्दुष्टप्रजायाः परिवर्तनाय ।
विश्वेऽवतीर्णं समतीतमायं
श्रीरामकृष्णं शरणं प्रपद्ये ॥ ३॥

दीप्ताननं तं परिपूर्णबोधं
सदा समाधौ परिमग्नचित्तम् ।
कृपाभिपूर्णं प्रति तप्तलोकं
श्रीरामकृष्णं शरणं प्रपद्ये ॥ ४॥

मृदं सुवर्णं प्रतिपद्य तुल्यं
नारीषु मातुस्समवाप्य भावम् ।
तद्बोधयन्तं च हिताय नृणां
श्रीरामकृष्णं शरणं प्रपद्ये ॥ ५॥

गङ्गासु सिक्तं मलिनाम्बु शुद्धं
रसेन्द्रसक्तेरय एव रुक्मम् ।
पापिष्ठमेवं विपुनाति यस्तं
श्रीरामकृष्णं शरणं प्रपद्ये ॥ ६॥

पाण्डित्यपूर्णाः कठिनैर्वचोभि-
यैर्द्बोधयन्ते श्रुतिसारभूतम् ।
येनैव तत्त्वं सुगमायितं तं
श्रीरामकृष्णं शरणं प्रपद्ये ॥ ७॥

दुर्ज्ञेयरूपः शिशुवद्विभाति
सर्वज्ञमूर्तिस्त्वनधीत शास्त्रः ।
देवाधिदेवोऽपि नरत्वमाप्तं
तं रामकृष्णं शरणं प्रपद्ये ॥ ८॥

इति स्वामिहर्षानन्दविरचिता “श्रीरामकृष्णप्रपत्तिः” समाप्ता ।

Proofread by Aruna Narayanan

*Shri Ramakrishna prapattih*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*